इति शब्दरत्नावली ॥ ("अश्वयुक् कृष्णपक्षे तु श्राद्धं कुर्य्यादिति स्मृतिः" । भाद्रपदाश्वयुजौ वर्षाः । इति सुश्रुतः ।)

अश्वरक्षः, पुं, (अश्वान् रक्षतीति । अश्व + रक्ष + अण् ।) घोटकरक्षकः । अश्वपालः । इति जटाधरः ॥

अश्वरोधकः, पुं, (अश्वान् रुणद्धि । अश्व + रुध् + ण्वुल् ।) करवीरवृक्षः । इति राजनिर्घण्टः ॥

अश्वलाला, स्त्री, (अश्वस्य लालेवाकारेण ।) सर्पविशेषः । तत्पर्य्यायः । हलाहलः २ ब्रह्मसर्पः ३ । इति त्रिकाण्डशेषः ॥

अश्ववक्त्रः, पुं, (अश्वस्य वक्त्रमिव वक्त्रं यस्य ।) किन्नरः । इति शब्दरत्नमाला ॥

अश्ववडवं, क्ली, अश्ववडवानां समाहारः । अश्ववडवयोर्द्वन्द्वे अश्ववडवौ । अश्ववडवानां द्वन्द्वे अश्ववडवाः । इत्यमरटीकायां भरतः सारसुन्दरी च । घोड़ा घुड़ीर समाहारद्वन्द्वसमासे क्लीवलिङ्गेर एकवचन हय इतरेतरद्वन्द्वे पुंलिङ्गेर द्विवचन बहुवचन हय इति भाषा ॥

अश्ववहः, पुं, (अश्वेन उह्यते यः सः । अश्व + वह + अच् ।) अश्ववाहकः । इति जटाधरः । घोड़सओयार इति भाषा ॥

अश्ववारः, पुं, (अश्वं वारयतीति । अश्व + वृ + अण् ।) सादी । इति हेमचन्द्रः । घोड़सओयार इति भाषा ॥

("परस्परोत्पीड़ितजानुभागा
दुःखेन निश्चक्रमुरश्ववाराः" ।
इति माघे ।)

अश्ववारणः, पुं, (अश्वं वारयति + अश्व + वृ + णिच् + ल्यु ।) गलकम्बलरहितगोसदृशपशुविशेषः । तत्पर्य्यायः । गवयः २ वनगवः ३ गोसदृक्षः ४ । इति हेमचन्द्रः ॥

अश्ववित्, [द्] पुं, (अश्वं अश्वविद्यां वेत्तीति । अश्व + विद् + क्विप् ।) नलराजः । इति त्रिकाण्डशेषः ॥ (नलस्य राज्ञोऽश्वविद्याज्ञता वर्णिता भारते । यथा ।

"बाहुकस्तमुवाचाथ देहि विद्यामिमां मम ।
मत्तोऽपि चाश्वहृदयं गृहाण पुरुषर्षभ ! ॥
ऋतुपर्णं ततो राजा बाहुकं कार्य्यगौरवात् ।
हयज्ञानस्य लोभाच्च तं तथेत्यब्रवीद्वचः ॥
यथोक्तं त्वं गृहाणेदमक्षाणां हृदयं परं ।
निक्षेपो मेऽश्वहृदयं त्वयि तिष्ठतु बाहुक" ॥
बाहुको बाहुकवेशधारी नलः ।)

अश्ववैद्यः, पुं, घोटकचिकित्सकः । सालोतरी इति हिन्दिभाषा । अश्वस्य वैद्यः इति षष्ठीतत्पुरुषसमासनिष्पन्नः ॥

अश्वशाला, स्त्री, घोटकगृहं । घोड़ार पाइशाल । आस्तवल् इति भाषा । यथा वाजिशाला तु मन्दुरा । इत्यमरः ॥ द्वे अश्वावस्थानगृहे । वाजिनोऽश्वस्य शाला गृहं वाजिशाला । अश्वशालादि च । इति तट्टीकायां भरतः ॥ ("कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च" । इति भारते ।)

अश्वशृगालिका स्त्री, (अश्वशृगालयोर्वैरम् । द्वन्द्वाद्वुन् वैरमैथुनिकयोरिति वुन् ।) अश्वशृगालयोर्वैरम् । इति शब्दरत्नावली ॥

अश्वषड्गवं, क्ली, (अश्व + षड्गवच् ।) अश्वषट्कं । षड़श्वाः । इति पाणिनिः ॥

अश्वसेननृपनन्दनः, पुं, (अश्वसेनो नृपस्तस्य नन्दनः ।) सनत्कुमारः । इति हेमचन्द्रः ॥

अश्वा, स्त्री, (अश्व + टाप् ।) घोटकी । घुड़ी इति भाषा । तत्पर्य्यायः । वामी २ वड़वा ३ । इत्यमरः ॥

अश्वारिः, पुं, (अश्वानामरिः ।) महिषः । इति जटाधरः ॥

अश्वारूढ़ः, पुं, (अश्व आरूढ़ो येन ।) अश्वारोहः । घोटकोपरि कृतारोहणः । यथा । "अश्वारोहास्तु सादिनः" । इत्यमरः ॥ द्वे अश्वारूढ़े । अश्वमारोहन्ति अश्वारोहाः ढात् षण् । सादयन्ति श्रमयन्ति अश्वान् सादिनः ग्रहादित्वात् णिन् । इति तट्टीकायां भरतः ॥

अश्वारोहः, त्रि, (अश्वमारोहतीति । अश्व + आ + रुह + अण् ।) अश्वपृष्ठस्थितयोद्धा । घोड़सोयार इति भाषा । तत्पर्य्यायः । सादीर इत्यमरः ॥ अश्ववहः ३ । इति जटाधरः ॥ अश्ववारः ४ तुरगी ५ । इति हेमचन्द्रः ॥

अश्वारोहा, स्त्री, अश्वगन्धावृक्षः । अश्ववाहके त्रि । इति मेदिनी ॥ (अश्वगन्धाशब्देऽस्याः गुणा व्याख्याताः ।)

अश्वारोही, [न्] त्रि, अश्वारोहणविशिष्टः । अश्वारूढ़ः । अश्वारोहणकर्त्ता । अश्वारोहणशीलः ॥ घोड़सोयार इति भाषा । अश्वमारोढुं शीलमस्येत्यर्थे णिन्प्रत्ययेन निष्पन्नः ॥

अश्वावरोहकः, पुं, अश्वगन्धावृक्षः । इति रत्नमाला ।

अश्वाक्षः, (अश्वस्याक्षीव ।) देवसर्षपवृक्षः । इति राजनिर्घण्टः ॥

अश्विनी, स्त्री, (अश्वः अश्वरूपं विद्यते यस्याः । अश्व + इन् + ङीप् ।) सप्तविंशतिनक्षत्रान्तर्गतप्रथमनक्षत्रं । अश्विन्यादयो रेवत्यन्ताः सप्तविंशतितारा दक्षस्यापत्यत्वात् दाक्षायण्य उच्यन्ते । तत्पर्य्यायः । अश्वयुक् २ दाक्षायणी ३ । इत्यमरः ॥ सा चन्द्रस्य भार्य्या । नवपादात्मकमेषराशेरादिचतुष्पादरूपा च ॥ अस्या रूपं । घोटकमुखाकृतितारात्रयात्मकं । अस्या अधिष्ठात्री देवता अश्वारूढ़पुरुषः । इति ज्योतिःशास्त्रं । तस्यां जातफलं । "सदैव देवाभ्युदितो विनीतः सत्त्वान्वितः प्राप्तसमस्तसम्पत् । योषाविभूषात्मजभूरितोषः स्यादश्विनीजन्मनि मानवस्य" । इति कोष्ठीप्रदीपः ॥ तस्य मस्तकोपरि उदये कर्कटलग्नस्य १।३० त्रिंशत्पलाधिकदण्डैको गतो भवति । यथा । "तन्वि घोटकमुखाकृतौ त्रिभे मस्तकोर्द्ध्वपथभाजि वाजिनि । चारुचन्द्रमुखि कर्कटोदयात् निर्गता गगनरन्ध्रलिप्तिका" ॥ इति श्रीकालिदासकृतरात्रिलग्ननिर्णयः ॥

अश्विनीकुमारौ, पुं, (अश्विन्या अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजौ कुमारौ ।) अश्विनीसुतौ । अश्वीभूतसंज्ञानामसूर्य्यपत्न्याः यमजपुत्त्रौ । तौ देवचिकित्सकौ । (यथा हरिवंशे,

"विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यामरिन्दम ! ।
तस्य भार्य्याभवत्संज्ञा त्वाष्ट्री देवी विवस्वतः" ॥
"देवौ तस्यामजायेतामश्विनौ भिषजां वरौ" ।)

नित्यद्विवचनान्तशब्दोऽयं ।

अश्विनीपुत्त्रौ, पुं, (अश्विन्याः पुत्त्रौ ।) स्वर्वैद्यौ । इति हेमचन्द्रः ॥

अश्विनीसुतौ, पुं, (अश्विन्याः सुतौ ।) अश्विनीपुत्त्रौ । तयोः पर्य्यायः । स्वर्वैद्यौ २ अश्विनौ ३ दस्रौ ४ नासत्यौ ५ आश्विनेयौ ६ । इत्यमरः । नासिक्यौ ७ गदागदौ ८ । इति जटाधरः ॥ पुष्करस्रजौ ९ । इति शब्दरत्नावली ॥

अश्विनौ, पुं, (प्रशस्ता अश्वाः सन्ति ययोः । इनिः । यद्वा, अश्विन्याम् जातौ । सन्धिवेलेत्यणो नक्षत्रेभ्यो बहुलमिति लुकि लुक्तद्धितलुकीति ङीपो लुक् ॥) अश्विनीकुमारौ । इत्यमरः ॥
("त्वाष्ट्री तु सवितुर्भार्य्या वड़वारूपधारिणी ।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ" ॥
इति महाभारते ।
"किमश्विनौ सोमरसं पिपासू" ।
इति भट्टौ ।)
("अश्विनौ देवभिषजौ यज्ञवाहाविति स्मृतौ ।
दक्षस्य हि शिरश्छिन्नं पुनस्ताभ्यां समाहितं ॥
प्रशीर्णा दशनाः पूष्णो नेत्रे नष्टे भगस्य च ।
वज्रिणश्च भुजस्तम्भस्ताभ्यामेव चिकित्सितः ॥
चिकित्सितश्च शीतांशुर्गृहीतो राजयक्ष्मणा ।
सोमाच्चिपतितश्चन्द्रः कृतस्ताभ्यां पुनः सुखी ॥
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः ।
वीतवर्णस्वरोपेतः कृतस्ताभ्यां पुनर्युवा ॥
एतैश्चान्यैश्च बहुभिः कर्म्मभिर्भिषगुत्तमौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां महात्मनां ॥
ग्रहास्तोत्राणि मन्त्राणि तथान्यानि हवींषि च ।
धूम्राश्च पशवस्ताभ्यां प्रकल्प्यन्ते द्विजातिभिः ॥
प्रातश्च सवने सोमं शक्रोऽश्विभ्यां सहाश्नुते ।
सौत्रामण्याञ्च भगवानश्विभ्यां सह मोदते ॥
इन्द्राग्नी चाश्विनौ चैव स्तूयन्ते प्रायशो द्विजैः ।
स्तूयन्ते वेदवाक्येषु न तथान्या हि देवताः ॥
अमरैरजरैस्तावद्विबुधैः साधिपैर्ध्रुवैः ।
पूज्येते प्रयतैरेवमश्विनौ भिषजाविति ॥"
इति चरकः ॥
"श्रूयते हि यथा रुद्रेण यज्ञस्य शिरश्छिन्नमिति ततो देवा अश्विनावभिगम्योचुः । भगवन्तौ नः श्रेष्ठतमौ युवां भविष्यथः । भवद्भ्यां यज्ञस्य शिरः सन्धातव्यं । तावूचतुरेवमस्त्विति । अथ तयोरर्थे देवा इन्द्रं यज्ञभागेन प्रासादयन् । ताभ्यां यज्ञस्य शिरः संहितमिति" ॥ इति सुश्रुतः ॥)

अश्वीनः, त्रि, एकाश्वकरणकदिनैकगम्यस्थानादिः । आश्विन इत्यमरः ॥ वृद्ध्यभावपक्षे अश्विनः ॥

अश्वीयं, क्ली, (अश्वानां समूहः । अश्व + छ ।) अश्ववृन्दं । अश्वसमूहः । तत्पर्य्यायः । आश्वं २ । इत्यमरः ॥